# Subrahmanya Aradhanam

# સુબ્રહ્મણ્યારાધનમ્

## Document Information

Text title : subrahmaNyarAdhanam

File name : subrahmaNyarAdhanam.itx

Category : subrahmanya, pUjA

Location : doc_subrahmanya

Transliterated by : Mahaperiaval trust

Proofread by : Preeti N Bhandare

Description-comments : Subramanya Sthuthi Manjari, Ed. S.V.Radhakrishna Sastri. See corresponding stotram

Latest update : June 26, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2023

*sanskritdocuments.org*

# સુબ્રહ્મણ્યારાધનમ્

પ્રક્ષાળિતપાણિપાદઃ
દેવસેનાપતે વલ્લીદેવીહૃત્કઞ્જમન્દિર ।
યાવત્પૂજાં કરિષ્યેઽહં પ્રસન્નો ભવ મે પ્રભો ॥

ઇતિ સમ્પ્રાર્થ્ય આસનં પરિકલ્પ્ય, આચમ્ય,
શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં વન્દે સર્વવિઘ્નોપશાન્તયે ॥

પ્રાણાનાયમ્ય આદૌ ગણપતિપૂજા સઙ્કલ્પઃ,
તદેવ લગ્નં સુદિનં તદેવ તારાબલં ચન્દ્રબલં તદેવ ।
વિદ્યાબલં દૈવબલં તદેવ લક્ષ્મીપતે તેઽઙ્ઘ્રિયુગં સ્મરામિ ॥

કરિષ્યમાણસ્ય કર્મણઃ અવિઘ્નેન પરિસમાપ્ત્યર્થં આદૌ મહાગણપતિપૂજાં
કરિષ્યે, તદઙ્ગં કલશપૂજાં ચ કરિષ્યે, ઇતિ સઙ્કલ્પ્ય,
કલશપૂજા- કલશં ગન્ધપુષ્પાક્ષતૈરભ્યર્ચ્ય, કલશં સ્પૃશન્
કલશસ્ય મુખે વિષ્ણુઃ કણ્ઠે રુદ્રસ્સમાશ્રિતઃ ।
મૂલે તત્ર સ્થિતો બ્રહ્મા મધ્યે માતૃગણાઃ સ્મૃતાઃ ॥

કુક્ષૌ તુ સાગરાસ્સર્વે સપ્તદ્વીપા વસુન્ધરા ।
ઋગ્વેદોઽથ યજુર્વેદઃ સામવેદોઽપ્યથર્વણઃ ॥

અઙ્ગૈશ્ચ સહિતાઃ સર્વે કલશામ્બુ સમાશ્રિતાઃ ।
સર્વે સમુદ્રાઃ સરિતસ્તીર્થાનિ ચ નદા હ્રદાઃ ।
આયાન્તુ દેવપૂજાર્થં દુરિતક્ષયકારકાઃ ॥

ગઙ્ગે ચ યમુને ચૈવ ગોદાવરિ સરસ્વતિ ।
નર્મદાસિન્ધુકાવેર્યો જલે કુરુત સન્નિધિમ્ ॥

મન્ત્રઃ - આપો વા ઇદઁ સર્વં વિશ્વા ભૂતાન્યાપઃ પ્રાણા વા આપઃ પશવ
આપોઽન્નમાપોઽમૃતમાપસ્સમ્રાડાપો વિરાડાપસ્સ્વરાડાપશ્છન્દાઁસ્યાપો

જ્યોતીઁષ્યાપો યજૂઁષ્યાપસ્સત્યમાપસ્સર્વા દેવતા આપો ભૂર્ભુવસ્સુવરાપ
ૐ ઇતિ જપિત્વા કલશોદકેન પૂજાદ્રવ્યાણિ દેવમાત્માનઞ્ચ પ્રોક્ષ્ય
ગણપતિ પૂજા ।
“ગણાનાં ત્વા ગણપતિઁ હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આનશ્શૃણ્વન્નૂતિભિસ્સીદ સાદનમ્ ।”
મહાગણપતિં ધ્યાયામિ, અસ્મિન્ બિમ્બે મહાગણપતિમાવાહયામિ ॥

મહાગણપતયે નમઃ આસનં સમર્પયામિ । પાદ્યં સમર્પયામિ । અર્ઘ્યં
સમર્પયામિ । આચમનીયં સમર્પયામિ । સ્નાનં સમર્પયામિ । સ્નાનાનન્તરં
આચમનીયં સમર્પયામિ । વસ્ત્રાણિ સમર્પયામિ । યજ્ઞોપવીતં સમર્પયામિ ।
ગન્ધાન્ ધારયામિ । ગન્ધોપરિ અક્ષતાન્ સમર્પયામિ । પુષ્પૈઃ પૂજયામિ ॥

ૐ સુમુખાય નમઃ એકદન્તાય । કપિલાય । ગજકર્ણકાય । લમ્બોદરાય ।
વિકટાય । વિઘ્નરાજાય । ગણાધિપાય । ધૂમકેતવે । ગણાધ્યક્ષાય ।
ભાલચન્દ્રાય । ગજાનનાય । વક્રતુણ્ડાય । શૂર્પકર્ણાય । હેરમ્બાય ।
સ્કન્દપૂર્વજાય । મહાગણાધિપતયે નમઃ । નાનાવિધપત્રપુષ્પાણિ
સમર્પયામિ ॥

ધૂપમાઘ્રાપયામિ । દીપં દર્શયામિ । ધૂપદીપાનન્તરં આચમનીયં
સમર્પયામિ । ૐ ભૂર્ભુવસ્સુવઃ । તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય
ધીમહિ । ધિયો યો નઃ પ્રચોદયાત્ । દેવ સવિતઃ પ્રસુવ । સત્યં
ત્વર્તેન પરિષિઞ્ચામિ । અમૃતોપસ્તરણમસિ ૐ પ્રાણાય સ્વાહા, ૐ
અપાનાય સ્વાહા, ૐ વ્યાનાય સ્વાહા, ૐ ઉદાનાય સ્વાહા, ૐ સમાનાય સ્વાહા,
ૐ બ્રહ્મણે સ્વાહા, બ્રહ્મણિ મ આત્માઽમૃતત્ત્વાય । મહાગણપતયે
નમઃ..........નિવેદયામિ મહાગણપતયે નમઃ મધ્યે મધ્યે પાનીયં
સમર્પયામિ । મહાગણપતયે નમઃ તામ્બૂલં સમર્પયામિ । મહાગણપતયે
નમઃ નીરાજનં સમર્પયામિ ।
વક્રતુણ્ડ મહાકાય સૂર્યકોટિસમપ્રભ ।
અવિઘ્નં કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ॥

મહાગણપતયે નમઃ મન્ત્રપુષ્પં સમર્પયામિ । મહાગણપતયે નમઃ
પ્રદક્ષિણ નમસ્કારાન્ સમર્પયામિ । સર્વોપચાર પૂજાસ્સમર્પયામિ ॥

મન્ત્રહીનં ક્રિયાહીનં ભક્તિહીનં ગણાધિપ ।
પૂજિતં યન્મયા દેવ પરિપૂર્ણં તદસ્તુ તે ।

અનયા પૂજયા શ્રીમહાગણપતિઃ પ્રીયતામ્ ॥

સઙ્કલ્પઃ-મમોપાત્ત સમસ્ત દુરિત ક્ષયદ્વારા શ્રીપરમેશ્વર પ્રીત્યર્થં, શુભે શોભને મુહૂર્તે અદ્ય બ્રહ્મણઃ દ્વિતીયપરાર્ધે શ્વેતવરાહકલ્પે વૈવસ્વતમન્વન્તરે અષ્ટાવિંશતિતમે કલૌ યુગે પ્રથમે પાદે જમ્બૂદ્વીપે ભારતવર્ષે ભરતખણ્ડે મેરોર્દક્ષિણે પાર્શ્વે શકાબ્દે અસ્મિન્ વર્તમાને વ્યાવહારિકે પ્રભવાદિષષ્ટિસંવત્સરાણાં મધ્યે..... નામ સંવત્સરે.....અયને.....ઋતૌ.....માસે.....પક્ષે .....વાસરયુક્તાયાં.....નક્ષત્રયુક્તાયાં શુભયોગ શુભકરણૈવં ગુણ વિશેષણ વિશિષ્ટાયાં અસ્યાં.....શુભતિથૌ અસ્માકં સકુટુમ્બાનાં શ્રીવલ્લીદેવસેનાસમેતશ્રીસુબ્રહ્મણ્યપ્રસાદ સિદ્ધ્યર્થં, તત્પ્રસાદેન શ્રીવલ્લીદેવસેના સમેત શ્રીસુબ્રહ્મણ્યેશ્વર મુદ્દિશ્ય યાવચ્છક્યં ધ્યાનાવાહનાદિ ષોડશોપચાર પૂજાં કરિષ્યે ॥ અપ ઉપસ્પૃશ્ય, વિઘ્નેશ્વર મુદ્વાસ્ય ॥

પ્રાણપ્રતિષ્ઠા- ૐ અસ્ય શ્રીવલ્લીદેવસેનાસમેત શ્રીસુબ્રહ્મણ્યેશ્વર પ્રાણ પ્રતિષ્ઠા મહામન્ત્રસ્ય - બ્રહ્મ વિષ્ણુ મહેશ્વરા ઋષયઃ ।
ઋગ્યજુસ્સામાથર્વાણિ છન્દાંસિ । પ્રાણશક્તિઃ પરા દેવતા ।
હ્રાં બીજમ્ । હ્રીં શક્તિઃ । હ્રૂં કીલકમ્ । શ્રીવલ્લીદેવસેનાસમેત શ્રીસુબ્રહ્મણ્યેશ્વર પ્રાણપ્રતિષ્ઠાર્થે જપે વિનિયોગઃ ।
અથ કરન્યાસઃ ।
હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
હ્રીં તર્જનીભ્યાં નમઃ ।
હ્રૂં મધ્યમાભ્યાં નમઃ ।
હ્રૈં અનામિકાભ્યાં નમઃ ।
હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ । એવં હૃદયાદિન્યાસઃ ।
ભૂર્ભુવસ્સ્વરોમિતિ દિગ્બન્ધઃ । ધ્યાનમ્-
રક્તામ્ભોધિસ્થપોતોલ્લસદરુણ સરોજાધિરૂઢા કરાબ્જૈઃ
પાશં કોદણ્ડમિક્ષૂદ્ભવ મળિગુણમપ્યઙ્કુશં પઞ્ચબાણાન્ ।
બિભ્રાણાઽસૃક્કપાલં ત્રિનયન લસિતા પીનવક્ષોરુહાઢ્યા

દેવી બાલાર્કવર્ણા ભવતુ સુખકરી પ્રાણશક્તિઃ પરા નઃ ॥

ૐ આં હ્રીં ક્રોં યં રં લં વં શં ષં સં હ્રૌં હંસઃ સોહં
સોહં હંસઃ અસ્ય પ્રાણાઃ મમ પ્રાણાઃ શ્રીવલ્લીદેવસેનાસમેત
શ્રીસુબ્રહ્મણ્યેશ્વરજીવો મમ જીવઃ વાઙ્મનશ્ચક્ષુઃ શ્રોત્ર જિહ્વા
ઘ્રાણ પ્રાણાપાનવ્યાનોદાનસમાનૈઃ સહ ઇહાગત્ય સુખં ચિરં તિષ્ઠન્તુ
સ્વાહા ।
મન્ત્રઃ- અસુનીતે પુનરસ્માસુ ચક્ષુઃ પુનઃ પ્રાણમિહ નો ધેહિ ભોગમ્ ।
જ્યોક્પશ્યેમ સૂર્યમુચ્ચરન્તમનુમતે મૃડયા નસ્સ્વસ્તિ । અમૃતં
વૈ પ્રાણાઃ અમૃતમાપઃ પ્રાણાનેવ યથાસ્થાનમુપહ્વયતે ॥

સ્વામિન્ સર્વજગન્નાથ યાવત્પૂજાવસાનકમ્ ।
તાવત્ત્વં પ્રીતિભાવેન બિમ્બેઽસ્મિન્ સન્નિધિં કુરુ ॥

આવાહિતો ભવ । સ્થાપિતો ભવ । સન્નિહિતો ભવ । સન્નિરુદ્ધો ભવ ।
અવકુણ્ઠિતો ભવ । સુપ્રસન્નો ભવ । વરદો ભવ । સ્વામિન્ પ્રસીદ
પ્રસીદ ॥

મન્ત્રઃ-આ ત્વા વહન્તુ હરયસ્સચેતસઃ શ્વતૈરશ્વૈસ્સહ કેતુમદ્ભિઃ ।
વાતા જિતૈર્બલવદ્ભિર્મનોજવૈરાયાહિ શીઘ્રં મમ હવ્યાય શર્વોમ્ ॥

॥ ઇતિ જપિત્વા અક્ષતાન્ પુષ્પાણિ ચ દેવતોપરિ પ્રક્ષિપેત્ ॥

પ્રાણપ્રતિષ્ઠાન્તે કિઞ્ચિન્નિવેદનં કુર્યાત્ ॥

પીઠપૂજા- ગું ગુરુભ્યો નમઃ । ગં ગણપતયે નમઃ ।
આધારશક્ત્યૈ નમઃ । મૂલપ્રકૃત્યૈ નમઃ । આદિકૂર્માય નમઃ । અનન્તાય નમઃ ।
પૃથિવ્યૈ નમઃ । શ્વેતછત્રાય નમઃ । સિતચામરાભ્યાં નમઃ ।
ધર્મકન્દાય નમઃ । જ્ઞાનનાળાય નમઃ । વૈરાગ્યકર્ણિકાય નમઃ ।
ઐશ્વર્ય પત્રાય નમઃ । યોગપીઠપદ્માય નમઃ ॥

પીઠ શક્તિપૂજા- વામાયૈ નમઃ । જ્યેષ્ઠાયૈ નમઃ । શ્રેષ્ઠાયૈ નમઃ ।
રૌદ્ર્યૈ નમઃ । કાળ્યૈ નમઃ । કલવિકરણ્યૈ નમઃ । બલવિકરણ્યૈ નમઃ ।
બલાયૈ નમઃ । બલપ્રમથિન્યૈ નમઃ । સર્વભૂતદમન્યૈ નમઃ ।
મનોન્મન્યૈ નમઃ । ૐ નમો ભગવતે સકલ ગુણાત્મશક્તિયુક્તાય
અનન્તાય મહાયોગપીઠાત્મને નમઃ ॥

શઙ્ખપૂજા- શઙ્ખાધારં પ્રક્ષાળ્ય । શઙ્ખાધારાય નમઃ ઇતિ આધારં

નિક્ષિપ્ય । શઙ્ખં પ્રક્ષાળ્ય આધારે વિન્યસ્ય । પાઞ્ચજન્યાય નમઃ ।
પર્જન્યાય નમઃ । ધવળાય નમઃ । સુસ્વનાય નમઃ । ઇત્યક્ષતાદિભિઃ
શઙ્ખમભ્યર્ચ્ય । જલેન શઙ્ખમાપૂર્ય હસ્તેન સંસ્પૃશ્ય
શઙ્ખં ચન્દ્રાર્કદૈવત્યં મધ્યે વરુણદૈવતમ્ ।
પૃષ્ઠે પ્રજાપતિં વિદ્યાદગ્રે ગઙ્ગાં સરસ્વતીમ્ ॥

શઙ્ખમૂલે સ્થિતો બ્રહ્મા શઙ્ખમધ્યે સરસ્વતી ।
શઙ્ખાગ્રે સર્વતીર્થાનિ તસ્માચ્છાઙ્ખં પ્રપૂજયે ॥

સુબ્રહ્મણ્યમૂલમન્ત્રં અષ્ટવારં જપિત્વા બિમ્બં પૂજાદ્રવ્યાણિ આત્માનં
ચ શઙ્ખતીર્થેન પ્રોક્ષ્ય । ગાયત્ર્યા પુનશ્શઙ્ખં પૂરયિત્વા મૂલેન
દેવતામાવાહ્ય સમસ્તોપચારાન્ સમર્પયામિ ઇતિ પૂજયેત્ ॥

સુબ્રહ્મણ્યપૂજાક્રમઃ ॥

સુબ્રહ્મણ્યમજં શાન્તં કુમારં કરુણાલયમ્ ।
કિરીટહારકેયૂરમણિકુણ્ડલમણ્ડિતમ્ ॥ ૧॥

ષણ્મુખં દ્વાદશભુજં શૂલાદ્યાયુધધારિણમ્ ।
સ્મિતવક્ત્રં પ્રસન્નાભં સ્તૂયમાનં સદા બુધૈઃ ॥ ૨॥

વલ્લીદેવીપ્રાણનાથં વાઞ્છિતાર્થપ્રદાયકમ્ ।
સિંહાસને સુખાસીનં સૂર્યકોટિસમપ્રભમ્ ।
દેવં વન્દે સદા ભક્ત્યા સ્વાન્તઃ કરણનિર્મલઃ ॥ ૩॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યં ધ્યાયામિ ॥

આવાહયામિ વિશ્વેશં સ્કન્દં સર્વગુણાકરમ્ ।
સર્વદુષ્કૃતિવિધ્વંસં સાક્ષાદ્રુદ્રસ્વરૂપિણમ્ ॥ ૪॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરં આવાહયામિ ॥

સુવર્ણવજ્રમાણિક્યપુષ્યરાગાદિસુન્દરમ્ ।
તુભ્યં સિંહાસનં દાસ્યે પ્રસીદ મમ સર્વદા ॥ ૫॥

શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ -
રત્ન ખચિત સિંહાસનં સમર્પયામિ ॥

ભક્તમન્દારપાદાબ્જં સંસારાર્ણવતારક ।
પાદ્યં ગૃહાણ વરદ પાપારણ્યાશુશુક્ષણે ॥ ૬॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ પાદ્યં સમર્પયામિ ॥

કર્પૂરાગરુકસ્તૂરીસુપુષ્પૈર્મિશ્રિતોદકમ્ ।
અર્ઘ્યં ગૃહાણ દેવેશ કરુણાવરુણાલય ॥ ૭॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ અર્ઘ્યં સમર્પયામિ ॥

તુઙ્ગભદ્રા કૃષ્ણવેણી કાવેરી ચ પિનાકિની ।
તાસાં પાનીયમાનીય દદામ્યાચમનીયકમ્ ॥ ૮॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ આચમનીયમ્ સમર્પયામિ ॥

ગીર્વાણાનીકિનીનાથ પ્રણતાર્તિપ્રભઞ્જન ।
મધુપર્કં ગૃહાણેદં પાહિ માં કરુણાનિધે ॥ ૯॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ  મધુપર્કં સમર્પયામિ ॥

શર્કરામધુગોક્ષીરફલસારઘૃતૈર્યુતમ્ ।
પઞ્ચામૃતસ્નાનમિદં બાહુલેય ગૃહાણ ભો ॥ ૧૦॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ  પઞ્ચામૃતસ્નાનં સમર્પયામિ ॥

(પઞ્ચામૃતમેલન મન્ત્રાઃ-
(૧) પયઃ = (milk) - "આપ્યાયસ્વ સમેતુ તે વિશ્વતઃ સોમ વૃષ્ણિયમ્ ।
ભવા વાજસ્ય સઙ્ગથે ।"
(૨) દધિ = (curd) - "દધિક્રાવણ્ણો અકારિષં જિષ્ણોરશ્વસ્ય
વાજિનઃ । સુરભિ નો મુખા કરત્ પ્રણ આયૂઁષિ તારિષત્ ।"
(૩) આજ્યમ્ = - (ghee) "શુક્રમસિ જ્યોતિરસિ તેજોંસિ દેવો
વસ્સવિતોત્પુનાત્વચ્છિદ્રેણ પવિત્રેણ વસોસ્સૂર્યસ્ય રશ્મિભિઃ ।"
(૪) મધુ = (honey)- "મધુ વાતા ઋતાયતે મધુક્ષરન્તિ સિન્ધવઃ ।
માધ્વીર્નસ્સન્ત્વોષધીઃ ।"
(૫) શર્કરા = (sugar) - "સ્વાદુઃ પવસ્વ દિવ્યાય જિન્વને
સ્વાદુરિન્દ્રાય સુહવે તુ નામ્ને । સ્વાદુર્મિત્રાયા વરુણાય વાયવે
બૃહસ્પતયે મધુમાઁ અદાભ્યઃ ।")
ફલોદકં = (fruit juice) - "યાઃ ફલિનીર્યા અફલા અપુષ્પા યાશ્ચ પુષ્પિણીઃ ।
બૃહસ્પતિપ્રસૂતાસ્તા નો મુઞ્ચન્ત્વઁહસઃ ।"
ગઙ્ગાદિપુણ્યતીર્થેભ્યઃ સમાહૃત્ય સુવાસિતમ્ ।
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ રં ફલોદકેન સ્નપયામિ ॥

શુદ્ધોદકસ્નાનમિદં ગૃહાણ શિખિવાહન ॥

મન્ત્રઃ - આપોહિષ્ઠા મયો ભુવઃ । તા ન ઊર્જે દધાતન । મહે રણાય
ચક્ષસે । યો વશ્શિવતમો રસઃ । તસ્ય ભાજયતેહ નઃ । ઉશતીરિવ
માતરઃ । તસ્મા અરં ગમામ વઃ । યસ્ય ક્ષયાય જિન્વથ । આપો જનયથા
ચ નઃ ॥

શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ શુદ્ધોદકસ્નાનં સમર્પયામિ ॥

એલાલવઙ્ગકસ્તૂરીકર્પૂરાદિસુવાસિતૈઃ ।
તીર્થૈરાચમ્યતાં દેવ ગઙ્ગાધરસુતાવ્યય ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ , આચમનીયં સમર્પયામિ ॥

મન્ત્રઃ- “અભિવસ્ત્રા સુવસનાન્યર્ષાભિ ધેનોસ્સુદુઘાઃ પૂયમાનાઃ ।
અભિચન્દ્રા ભર્તવે નો હિરણ્યોઽભ્યશ્વાન્ રથિનો દેવ સોમ ॥”

દુકૂલવસ્ત્રયુગળં મુક્તાજાલસમન્વિતમ્ ।
પ્રતિગૃહ્ણીષ્વ ગાઙ્ગેય ભક્તાપદ્ભઞ્જનક્ષમ ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ વસ્ત્રયુગ્મં સમર્પયામિ ॥

મન્ત્રઃ- “યજ્ઞોપવીતં પરમં પવિત્રં પ્રજાપતેર્યત્સહજં
પુરસ્તાદાયુષ્યમગ્રિયં પ્રતિમુઞ્ચ શુભ્રં યજ્ઞોપવીતં બલમસ્તુ
તેજઃ ॥”

રાજતં બ્રહ્મસૂત્રઞ્ચ કાઞ્ચનઞ્ચોત્તરીયકમ્ ।
સુબ્રહ્મણ્ય મહાભાગ ગૃહાણ સુરનાયક ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ યજ્ઞોપવીતં સમર્પયામિ ॥

નિત્યાગ્નિહોત્રસમ્ભૂતં વિરજાહોમપાવિતમ્ ।
ગૃહાણ ભસ્મ હે સ્વામિન્ ભક્તાનાં ભૂતિદાયક ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ ધારણાર્થં ભસ્મ સમર્પયામિ ॥

મન્ત્રઃ-
“ગન્ધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં કરીષિણીમ્ ।
ઈશ્વરીં સર્વભૂતાનાં ત્વામિહોપહ્વય શ્રિયમ્ ॥”

કસ્તૂરીકુઙ્કુમાદ્યૈશ્ચ વાસિતં સહિમોદકમ્ ।
ગન્ધં વિલેપનાર્થાય ગૃહાણ ક્રૌઞ્ચદારણ ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ ગન્ધાન્ ધારયામિ ॥

અક્ષતા ધવળા દિવ્યાશ્શાલીયાસ્તણ્ડુલાશ્શુભાઃ ।

કાઞ્ચનાક્ષતસંયુક્તા ગૃહ્યન્તાં શમ્ભુનન્દન ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ  અક્ષતાન્ સમર્પયામિ ॥

પુન્નાગવકુળાશોકનીપપાટલિજાનિ ચ ।
વાસન્તિકાબિલ્વજાજીપુષ્પાણિ સ્વીકુરુ પ્રભો ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ નાનાવિધ પુષ્પાણિ સમર્પયામિ ॥

અઙ્ગપૂજા ॥  સુરવન્દિતપાદાય નમઃ - પાદૌ પૂજયામિ ।
મુકુરાકારજાનવે નમઃ - જાનુની પૂજયામિ ।  કરિરાજકરોરવે નમઃ - ઊરૂ પૂજયામિ ।
રત્નકિઙ્કિણિકાયુક્તકટયે નમઃ - કટિં પૂજયામિરમ્ ।  ગુહાય નમઃ -
ગુહ્યં પૂજયામિ ।  હેરમ્બસહોદરાય નમઃ - ઉદરં પૂજયામિ ।
સુનાભયે નમઃ - નાભિં પૂજયામિ ।  સુહૃદે નમઃ - હૃદયં પૂજયામિ ।
વિશાલવક્ષસે નમઃ - વક્ષઃ પૂજયામિ ।
કૃત્તિકાસ્તનન્ધયાય નમઃ - સ્તનૌ પૂજયામિ ।
શત્રુજયોર્જિતબાહવે નમઃ - બાહૂન્ પૂજયામિ ।
શક્તિહસ્તાય નમઃ - હસ્તાન્ પૂજયામિ ।  પુષ્કરસ્રજે નમઃ - કણ્ઠાન્ પૂજયામિ ।
ષણ્મુખાય નમઃ - મુખાનિ પૂજયામિ ।  સુનાસાય નમઃ - નાસિકાઃ પૂજયામિ ।
દ્વિષણ્ણેત્રાય નમઃ - નેત્રાણિ પૂજયામિ ।
હિરણ્યકુણ્ડલાય નમઃ - કર્ણાન્ પૂજયામિ ।
ભાલનેત્રસુતાય નમઃ - ફાલાનિ પૂજયામિ ।
વેદશિરોવેદ્યાય નમઃ - શિરાંસિ પૂજયામિ ।
સેનાપતયે નમઃ - સર્વાણ્યઙ્ગાનિ પૂજયામિ ।
(અષ્ટોત્તરશતનામાર્ચનં અષ્ટોત્તર સહસ્રનામાર્ચનં
વલ્લીદેવસેનયોરપ્યષ્ટોત્તરશતનામાર્ચનં કુર્યાત્ ॥)
મન્ત્રઃ-
ધૂરસિ ધૂર્વ ધૂર્વન્તં તં યોઽસ્માન્ ધૂર્વતિ તં ધૂર્વ
યં વયં ધૂર્વામઃ ॥"

દશાઙ્ગં ગુગ્ગુલૂપેતં સુગન્ધિ સુમનોહરમ્ ।
કપિલાઘૃતસંયુક્તં ધૂપં ગૃહ્ણીષ્વ ષણ્મુખ ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ  ધૂપમાઘ્રાપયામિ ॥

મન્ત્રઃ-
"ઉદ્દીપ્યસ્વ જાતવેદોઽપઘ્નન્નિરૃતિં મમ । પશૂँશ્ચ

મહ્યમાવહ જીવનઞ્ચ દિશો દિશ । મા નો હિઁસીજ્જાતવેદો ગામશ્વં
પુરુષં જગત્ । અબિભ્રદગ્ન આગહિ શ્રિયા મા પરિપાતય ॥”

સાજ્યં ત્રિવર્તિસંયુક્તં વહ્નિના યોજિતં મયા ।
દીપં ગૃહાણ સ્કન્દ ત્વં ત્રૈલોક્યતિમિરાપહમ્ ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ  દીપં સન્દર્શયામિ ॥

મન્ત્રઃ- ૐ ભૂર્ભુવસ્સુવઃ । તત્સવિતુર્વરેણ્યં ભર્ગો દેવસ્ય ધીમહિ ।
ધિયો યોનઃ પ્રચોદયાત્ । દેવ સવિતઃ પ્રસુવ । સત્યં ત્વર્તેન
પરિષિઞ્ચામિ । અમૃતોપસ્તરણમસિ । ૐ પ્રાણાય સ્વાહા । અપાનાય સ્વાહા ।
વ્યાનાય સ્વાહા । ઉદાનાય સ્વાહા । સમાનાય સ્વાહા । બ્રહ્મણે સ્વાહા ।
મધુ વાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવઃ । માધ્વીર્નસ્સન્ત્વોષધીઃ ।
મધુ નક્તમુતોષસિ મધુમત્પાર્થિવઁ રજઃ । મધુ દ્યૌરસ્તુ નઃ પિતા ।
મધુમાન્નો વનસ્પતિર્મધુમાઁ અસ્તુ સૂર્યઃ । માધ્વીર્ગાવો ભવન્તુ નઃ ।
મધુ મધુ મધુ । અઙ્ગુષ્ઠમાત્રઃ પુરુષોઽઙ્ગુષ્ઠઞ્ચ સમાશ્રિતઃ ।
ઈશસ્સર્વસ્ય જગતઃ પ્રભુઃ પ્રીણાતિ વિશ્વભુક્ ॥

લેહ્યં ચોષ્યઞ્ચ ભોજ્યઞ્ચ પાનીયં ષડ્રસાન્વિતમ્ ।
ભક્ષ્યશાકાદિસંયુક્તં નૈવેદ્યં સ્કન્દ ગૃહ્યતામ્ ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ
..... મહાનૈવેદ્યં નિવેદયામિ ॥

પાનીયં પાવનં શ્રેષ્ઠં ગઙ્ગાદિસરિદાહૃતમ્ ।
દાહોપશમનાર્થં ત્વં સંગૃહાણ ષડાનન ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ મધ્યે મધ્યે પાનીયં સમર્પયામિ ।
હસ્તપ્રક્ષાળનં સમર્પયામિ । પાદપ્રક્ષાળનં સમર્પયામિ ।
શુદ્ધાચમનીયં સમર્પયામિ ॥

પૂગીફલસમાયુક્તં નાગવલ્લીદળૈર્યુતમ્ ।
કર્પૂરચૂર્ણસંયુક્તં તામ્બૂલં પ્રતિગૃહ્યતામ્ ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ  તામ્બૂલં સમર્પયામિ ॥

મન્ત્રઃ- સોમો વા એતસ્ય રાજ્યમાદત્તે । યો રાજા સન્રાજ્યો વા સોમેન યજતે ।
દેવસુવામેતાનિ હવીઁષિ ભવન્તિ । એતાવન્તો વૈ દેવાનાઁ સવાઃ । ત એવાસ્મૈ
સવાન્ પ્રયચ્છન્તિ । ત એનં પુનસ્સુવન્તે રાજ્યાય । દેવસૂરાજા ભવતિ ॥

દેવસેનાપતે સ્કન્દ સંસારધ્વાન્તભાસ્કર ।

નીરાજનમિદં દેવ ગૃહ્યતાં સુરસત્તમ ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ  નીરાજનં સમર્પયામિ ॥

મન્ત્રઃ - યોઽપાં પુષ્પં વેદ । પુષ્પવાન્ પ્રજાવાન્ પશુમાન્ ભવતિ ।
ચન્દ્રમા વા અપાં પુષ્પમ્ । પુષ્પવાન્ પ્રજાવાન્ પશુમાન્ ભવતિ ॥

પુષ્પાઞ્જલિં પ્રદાસ્યામિ ભક્તાભીષ્ટપ્રદાયક ।
ગૃહાણ વલ્લીરમણ સુપ્રીતેનાન્તરાત્મના ॥
શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ  મન્ત્રપુષ્પં સમર્પયામિ ॥

યાનિ કાનિ ચ પાપાનિ જન્માન્તરકૃતાનિ ચ ।
તાનિ તાનિ વિનશ્યન્તિ પ્રદક્ષિણ પદે પદે ॥

ષડાનનં કુઙ્કુમરક્તવર્ણં દ્વિષડ્ભુજં બાલકમમ્બિકાસુતમ્ ।
રુદ્રસ્ય સૂનું સુરસૈન્યનાથં ગુહં સદાહં શરણં પ્રપદ્યે ॥

ઉમાકોમળહસ્તાબ્જ સમ્ભાવિતલલાટકમ્ ।
હિરણ્યકુણ્ડલં વન્દે કુમારં પુષ્કરસ્રજમ્ ॥

શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ
પ્રદક્ષિણ નમસ્કારાન્ સમર્પયામિ ॥

છત્રં સમર્પયામિ । ચામરં સમર્પયામિ । દર્પણં દર્શયામિ ।
ગીતં શ્રાવયામિ । નૃત્યં કારયામિ । આન્દોળિકામારોપયામિ । અશ્વમારોપયામિ ।
ગજમારોપયામિ । સમસ્તરાજોપચાર દેવોપ ચારાન્ સમર્પયામિ ॥

અર્ઘ્યદાનવિધિઃ- સઙ્કલ્પઃ- અદ્યપૂર્વોક્તૈવં ગુણવિશેષણ
વિશિષ્ટાયામસ્યાં..... શુભતિથૌ શ્રીવલ્લીદેવસેનાસમેત
શ્રીસુબ્રહ્મણ્યેશ્વર પ્રીત્યર્થં મયા આચરિતસ્ય સુબ્રહ્મણ્યપૂજનસ્ય
સમ્પૂર્ણફલાવાપ્ત્યર્થં અર્ઘ્યપ્રદાનં કરિષ્યે । પાત્રસ્થ
શર્કરામિશ્રિત ક્ષીરોદકૈઃ સાક્ષતાઞ્જલિરર્ઘ્યં દદ્યાત્ ॥

શ્રીગમદ્વલ્લીસમાયુક્ત દેવસેનામનોહર ।
કરુણારસસમ્પૂર્ણ પ્રસન્નાર્ઘ્યં પ્રગૃહ્યતામ્ ॥

શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ
ઇદમર્ઘ્યમ્, ઇદમર્ઘ્યમ્, ઇદમર્ઘ્યમ્ ॥

કાર્તિકેય મહાબાહો કામિતાર્થપ્રદાયક ।

ભક્તપાલન દેવેશ પ્રસન્નાર્ઘ્યં પ્રગૃહ્યતામ્ ॥

શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ
ઇદમર્ઘ્યમ્, ઇદમર્ઘ્યમ્, ઇદમર્ઘ્યમ્ ॥

પરબ્રહ્મ સદાનન્દ પાપારણ્યદવાનલ ।
સુબ્રહ્મણ્ય સુખાનન્દ પ્રસન્નાર્ઘ્યં પ્રગૃહ્યતામ્ ॥

શ્રીવલ્લીદેવસેનાસમેતં શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ
ઇદમર્ઘ્યમ્, ઇદમર્ઘ્યમ્, ઇદમર્ઘ્યમ્ ॥

નીલકણ્ઠ મહાભાગ સુબ્રહ્મણ્યસ્ય વાહન ।
ઇદમર્ઘ્યં પ્રદાસ્યામિ સુપ્રીતો ભવ સર્વદા ॥

મયૂરાય નમઃ ઇદમર્ઘ્યમ્, ઇદમર્ઘ્યમ્, ઇદમર્ઘ્યમ્ ॥

અનેનાર્ઘ્યપ્રદાનેન સુબ્રહ્મણ્યસ્સુપ્રીતસ્સુપ્રસન્નો વરદો ભવતુ ।
પુત્રં દેહિ યશો દેહિ સમ્પદં દેહિ શાશ્વતીમ્ ।
ત્વયિ ભક્તિઞ્ચ મે દેહિ પરત્ર ચ પરાં ગતિમ્ ॥

આદિત્યવિષ્ણુવિઘ્નેશરુદ્રબ્રહ્મમરુદ્ગણાઃ ।
લોકપાલાસ્સર્વદેવાશ્ચરાચરમિદં જગત્ ।
સર્વં ત્વમેવ બ્રહ્મૈવમજમક્ષરમદ્વયમ્ ।
અપ્રમેયં મહાશાન્તમચલં નિર્વિકારકમ્ ।
નિરાલમ્બં નિરાભાસં સત્તામાત્રસ્વરૂપકમ્ ।
એવં ત્વાં મેધયા બુદ્ધ્યા સદા પશ્યન્તિ સૂરયઃ ॥

ન પશ્યન્તિ સદા મૂઢાઃ સદા દુર્ગતિહેતુતઃ ।
વિષ્ણ્વાદીનિ સ્વરૂપાણિ લીલાલોકવિડમ્બનમ્ ।
કર્તુમુદ્યમ્ય રૂપાણિ વિવિધાનિ ભવન્તિ ચ ।
તત્તદુક્તાઃ કથાસ્સમ્યઙ્ નિત્યસદ્ગત્યવાપ્તયે ।
ભક્ત્યા શ્રુત્વા પઠિત્વા ચ દૃષ્ટ્વા સમ્પૂજ્ય ભક્તિતઃ ।
સર્વાન્કામાનવાપ્નોતિ ભવદારાધનાત્ખલુ ।
મમ પૂજાં સમ્પ્રગૃહ્ય સુપ્રસન્નો ભવાનઘ ॥

ચપલં મન્મથવશમમર્યાદમસૂયકમ્ ।
વઞ્ચકં દુઃખજનકં પાપિષ્ઠં પાહિ માં પ્રભો ॥

ઇતિ પ્રાર્થયેત્ ॥

ઇતિ સુબ્રહ્મણ્યારાધનં સમ્પૂર્ણમ્ ।

Proofread by Preeti N. Bhandare

*Subrahmanya Aradhanam*

pdf was typeset on August 13, 2023

Please send corrections to *sanskrit@cheerful.com*